# शरणागति

## धर्मं चर

## सत्यधर्मः सनातनः

यज्ञ दान तपः कर्म स्वाध्याय निरतो भवेत्
एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः

## वेदतत्त्व दशकम्

(दश आज्ञा)

१ **सत्य**
सत्यस्य नावः सुकृतमपीपरन् ।

२ **अहिंसा**
अनागो हत्य वै भीमा ।

३ **दया**
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ।

४ **शिवसङ्कल्प**
तन्मे मनः शिवसङ्कल्पमस्तु ।

५ **दंतृत्व**
उतो रयिः पृणतो नोप दस्यति ।

६ **पवित्राचरण**
शुद्धाः पूता भवत यज्ञियासः ।

७ **ब्रह्मचर्य**
ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति ।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छति ।

८ **तप**
अतप्ततनूर्न तदामो अश्नुते ।

९ **स्वाध्याय**
पावका नः सरस्वती ।

१० **ईश्वर प्रणिधान**
महे च न त्वामद्रिवः पराशुक्लाय देयाम् ।
त्वमस्माकं तव स्मसि ।

तपः स्वाध्यायेश्वरप्रणिधानानि क्रिया योगः

# ईश्वर प्रणिधानम्

**(नैमित्तिको व्याहृति होमः)**

भूः स्वाहा अग्नये इदं न मम
भुवः स्वाहा वायवे इदं न मम
स्वः स्वाहा सूर्याय इदं न मम
भूर्भुवः स्वः स्वाहा प्रजापतये इदं न मम

# सप्त श्लोकी

**धर्मादेशः**

यदा सृष्टं जगत्सर्वं तदा लोकपिता महः ।
चतुर्वेद समायुक्तं शाश्वतं धर्ममादिशत् ॥१॥
किं सत्कर्म किमध्यात्मं यदि विज्ञातुमर्हति ।
सर्व शास्त्रेषु ग्रंथेषु प्रमाणं परमं श्रुतिः ॥२॥
अस्पष्टं च कदा स्पष्टं तत्त्वज्ञान विवेचनम् ।
अन्यत्र लभ्यते किंतु प्रमाणं परमं श्रुतिः ॥३॥
आर्ष ग्रंथेषु सर्वेषु श्रुति प्रामाण्य मेव च ।
सर्वतः सारमादद्यान्निजकल्याण हेतवे ॥४॥
शुष्कवादरताः केचिन्नान्यदस्तीतिवादिनः ।
सर्वे ते विलयं यान्ति मिथ्याकलहकारिणः ॥५॥
नास्तिका वेदनिन्दकाः पाखण्डा वेददूषकाः ।
एते सर्वे विनश्यन्ति मिथ्याचार प्रवर्तकाः ॥६॥
यज्ञ दान तपः कर्म स्वाध्याय निरतो भवेत् ।
एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः ॥७॥

# त्रिसत्य शरणागति

त्रिसत्य प्रतिज्ञा

सत्यं शरणं गच्छामि
सत्यधर्मं शरणं गच्छामि
सत्यधर्मसङ्घं शरणं गच्छामि